सुपरि वस्त्राच्छादितमनुष्यवाह्ययानविशेषः। इत्यमरभरतौ। २। ८। ५२॥ ( यथा, मृच्छकटिकनाटके चतुर्थेऽङ्के। "प्रविश्य सप्रवहणचेटः इति॥")

प्रवह्लिः, स्त्री, ( प्रवह्लते आच्छादयतीति। प्र+वह्ल+इन्।) प्रवह्लिका। इत्यमरटीकायां भरतः॥

प्रवह्लिका, स्त्री, ( प्र+वह्ल्+ण्वुल्। टाप् अत इत्वम्।) प्रहेलिका। इत्यमरः। १। ६। ६॥

प्रवह्ली, स्त्री, ( प्रवह्लि+पक्षे ङीष्।) प्रवह्लिका। इति भरतः॥

प्रवाक्, [च्] त्रि, ( प्रकृष्टा वाग् यस्य।) वाचोयुक्तिपटुः। यथा,—

"वाचो युक्तिपटुर्वाग्मी वचोज्ञः प्रवचाः प्रवाक्॥"

इति जटाधरः॥

( स्त्री, प्रकृष्टा वागिति प्रादिसमासः।) प्रकृष्टवाक्यञ्च॥

प्रवाचकः, त्रि, ( प्रकृष्टं वक्तीति। प्र+वच्+ण्वुल्।) प्रकृष्टवक्ता। प्रपूर्ब्बवचधातोः कर्त्तरि णकप्रत्ययः॥

प्रवाणिः, स्त्री, ( प्रकर्षेण उयतेऽनयेति। प्र+वे+करणे ल्युट्। ङीप्। निपातनात् ङीपो ह्रस्वः।) तन्त्रशलाका। इति नियवाणिशब्दटीकायां भरतः॥ माकु इति भाषा॥

प्रवाणी, स्त्री, ( प्र+वे+ल्युट्+ङीप्।) तन्त्रशलाका। इति नियवाणिशब्दटीकायां भरतः॥ माकु इति भाषा॥

प्रवादः, पुं, (प्रकृष्टो वादः। प्र+वद्+घञ् वा।) परस्परवाक्यम्। यथा, भट्टिः। २। ३६।

"इत्थं प्रवादं युधि संप्रहारं
प्रचक्रतू रामनिशाविहारौ।
तथाय मत्वा रघुनन्दनोऽथ
बाणेन रक्षः प्रधनान्निरास्थत्॥"

जनरवः। यथा,—

"प्रेयांस्तेऽहं त्वमपि च मम प्रेयसीति प्रवादस्त्वं मे प्राणा अहमपि तवास्मीति हन्त प्रलापः। त्वं मे तेऽस्म्यहमपि च यत्तच्च नो साधु राधे! व्याहारे नौ नहि समुचितो युष्मदस्मत्प्रयोगः॥"

इत्यलङ्कारकौस्तुभः॥

प्रवारः, पुं, ( प्रव्रियतेऽनेनेति। प्र+वृ+करणे घञ्।) प्रवरः। वस्त्रम्। प्रपूर्ब्बवृधातोर्घञ्। इति संक्षिप्तसारव्याकरणम्॥

प्रवारणं, क्ली, ( प्र+वृ+णिच्+ल्युट्।) काम्यदानम्। इत्यमरः। ३। २। ३॥ काम्यस्य कमनीयस्य वस्तुनो वरस्त्रीरत्नादिनो दानम्। काम्येन कामनया वा दानं प्रवारणमुच्यते। काम्यशब्दोऽत्र तल्लोभाभयार्थः। प्रकर्षेण वार्य्यते संक्षेयत प्रवारणं तच्च महादानम्। प्रवारणं महादानमिति त्रिकाण्डशेषः। इति तट्टीकायां भरतः॥ ( प्रकर्षेण वारणमिति।) निषेधः। इति मेदिनी। णे, १०९॥

प्रवासः, पुं, ( प्रवसन्त्यस्मिन्निति। प्र+वस्+"हलश्च।" ३। ३। १२१। इति घञ्।) विदेशः। विदेशस्थितिः। यथा,—

"कर्णेजपैराहितराज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना।
रामप्रवासे व्यमृशन्नदोषं
जनापवादं सनरेन्द्रमृत्युम्॥"

इति भट्टिः। ३। ७॥ * ॥

द्वादशवर्षाश्रुतवार्त्ताकप्रोषितस्य तत्प्रवासाद्यदिने श्राद्धं कर्त्तव्यम्। यथा,—

"प्रवासवासरे ज्ञेयं तन्मासेन्दुक्षयेऽथवा॥"

इति मिताक्षरा। ३। ७॥ * ॥

प्रवासागतेन गुर्व्वाद्यभिवादनं कर्त्तव्यम्। यथा,

"विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन्॥
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा।
प्रपूज्या गुरुपत्नीव समास्ता गुरुभार्य्यया॥
भ्रातृभार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि।
विप्रोष्य भूप! संग्राह्या ज्ञातिसम्बन्धियोषितः॥
पितुर्भगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी॥"

इति कौर्म्मे उपविभागे १३ अध्यायः॥

प्रवासनं, क्ली, ( प्र+वास छेदे+ल्युट्।) वधः। इत्यमरः॥ ( प्र+वस्+णिच्+ल्युट्।) प्रवासना। यथा, उत्तररामचरिते।

"सीताप्रवासनपटोः करुणा कुतस्ते॥"

प्रवासी, त्रि, (प्रवसितुं शीलमस्येति। प्र+वस्+"ग्रे लपसुद्रुमथवदवसः।"३। २। १४५। इति घिनुण्।) प्रवासविशिष्टः। प्रोषितः। विदेशस्थः। यथा,—

"अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकदेशिकौ।
प्रवासी तद्गणो हारिः पाथेयं सम्बलं समे॥"

इति हेमचन्द्रः। ३। १५७॥

( यथा, मार्कण्डेये। १८। ५१।

"लक्ष्मीर्लक्ष्मीवतां श्रेष्ठा कण्ठस्था कण्ठभूषणम्।
अभीष्टबन्धुदारैश्च तथासौ प्रवासिभिः॥")

प्रवाहः, पुं, ( प्र+वह्+भावे घञ्।) प्रवृत्तिः। ( यथा, भागवते। ७। ६। ८।

"सत्केतनागतयो वचसां प्रवाहैः॥"

जलस्रोतः। इति मेदिनी। हे, २१॥ ( यथा, रघौ। ५। ४६।

"पूर्व्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प॥")

व्यवहारः। इति विश्वः॥ प्रकृष्टाश्वः। इति नानार्थरत्नमाला॥ ( पुरीषादेर्निर्गमः। यथा, सुश्रुते उत्तरतन्त्रे। ४० अध्याये।

"प्रवाहेण गुदभ्रंशे मूत्राघाते कटिग्रहे।
मधुराम्लशृतं तैलं सर्पिर्वाप्यनुवासनम्॥")

प्रवाहकः, पुं, ( प्रवहतीति। प्र+वह्+ण्वुल्।) राक्षसः। इति शब्दमाला॥ प्रकृष्टवहनकर्त्तरि, त्रि॥

प्रवाहिका, स्त्री, ( प्रवहति मुहुर्मुहुः प्रवर्त्तते इति। प्र+वह्+ण्वुल्। टाप् अत इत्वम्।) ग्रहणीरुक्। इत्यमरः। २। ६। ५५॥ ( यथा, सुश्रुते सूत्रस्थाने। ३१ अध्याये।

"प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम्।
पिपासाबलहानिश्च तस्य मृत्युरुपस्थितः॥"

अस्या निदानं ग्रहणीशब्दे द्रष्टव्यम्। अस्याः स्वरूपमाह चरकः।

"अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता।
अपक्वं धारयेत् तच्च पक्वं त्यजति वाप्यधः॥"

सुश्रुतोऽपि।

"षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता।
आमपक्वाशयान्तःस्था ग्रहणी साभिधीयते॥
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः।
तस्मादग्नौ प्रदुष्टे तु ग्रहण्यपि विदुष्यति॥
तस्मात् कार्य्यः परीहारो ह्यतीसारे विरिक्तवत्॥" * ॥

अतीसारे द्रवधातुप्रवृत्तिः ग्रहण्यान्तु बद्धस्यापि मलस्य प्रवृत्तिरिति तयोर्भेदः॥ * ॥ ग्रहणीरोगस्य भेदं संग्रहग्रहणीरोगमाह।

"द्रवं घनं सितं स्निग्धं सकटीवेदनं शकृत्।
आमं बहुसपैच्छिल्यं सशब्दं मन्दवेदनम्॥
पक्षान्मासाद्दशाहाद्वा नित्यञ्चापि विमुञ्चति।
अन्त्रकूजनमालस्यं दौर्ब्बल्यं सदनं भवेत्॥
दिवा प्रकोपो भवति रात्रौ शान्तिञ्च गच्छति।
दुर्विज्ञेया दुर्निवारा चिरकालानुबन्धिनी॥
सा भवेदामवातेन संग्रहग्रहणी मता॥"

अथ घटीयन्त्राख्यं ग्रहणीरोगमाह।

"प्रसुप्तिः पार्श्वयोः शूलं तथा जलघटीध्वनिः।
तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम्॥"

अथ ग्रहणीरोगस्यारिष्टमाह।

"यैर्लक्षणैः सिध्यति नातिसारस्तैः स्यान्न साध्यो ग्रहणीगदोऽपि।
वृद्धस्य जायेत यदा गदोऽयं
देहं तदा तस्य विनाशमृच्छेत्॥" * ॥

अथ सामान्यग्रहणीरोगस्य चिकित्सामाह।

"ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत्।
लङ्घनैर्दीपनीयैश्च मन्दातीसारभेषजैः॥
दोषं सामं निरामञ्च विद्यादत्रातिसारवत्।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत्॥
पेयादि पटु लघ्वन्नं पञ्चकोलादिभिर्युतम्।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक्॥
कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता।
यवागूः पाचयत्यामं शकृत् संवर्त्तयत्यपि॥"

संवर्त्तयति घनीकरोति॥

अथ खड्यूषः।

"मुद्गयूषं रसं तक्रं धान्यजीरकसंयुतम्।
सैन्धवेनान्वितं दद्यात् खड्यूषमिति कीर्त्तितम्॥"

रसं लघुग्राहिकमांसभवम्॥ * ॥

"कर्षं गन्धकमर्द्धपारदसमे कुर्य्याच्छुभां कज्जलीं
त्र्यक्षं भूषयतश्च पञ्चलवणं व्योषञ्च कर्षं पृथक्।